संस्कृत-वार्ता:
08.07.2024
सायम् - 06:20

<u>मुख्यवार्ता:</u>

- प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्य रूस-आस्ट्रिया-देशयो: च त्रिदिवसीय आधिकारिक-यात्राया: प्रथमे चरणे मॉस्कोनगरं प्राप्तवान्।
- झारखण्डविधानसभायाम् अद्य हेमन्त-सोरेन-सर्वकारेण विश्वासमतम् अधिगतम्।
- मुम्बय्या: विविधेषु भागेषु अद्य अत्यधिकवृष्ट्या: कारणेन सामान्यं जनजीवनं प्रभावितं जातम्। भारतुर्त-विज्ञान-विभागेन सुरक्षादृशा नारङ्गसञ्चेतनापि प्रख्यापिता।
- सप्तवारपर्यन्तं विश्वविजेता द्वितीयवरीयताप्राप्त: च नोवक-जोकोविच: अद्य रात्रौ षोडश चक्रके द्वन्द्वे पञ्चदश वरीयताप्राप्तेन डेनिश-होल्गर-रून-इत्यनेन सह स्पर्धां करिष्यति।

<u>मोदिन: रूसॉस्ट्रिया यात्रा</u>

प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्य रूस-आस्ट्रिया-देशयो: च त्रिदिवसीय आधिकारिक-यात्राया: प्रथमे चरणे मॉस्कोनगरं प्राप्तवान्। तत्र प्राप्ते: अनन्तरं मॉस्कोविमानपत्तने श्रीमोदिन: भव्यं राजकीयं स्वागतं जातम्। अस्मिन् अवसरे रूस-देशस्य उप-प्रधानमन्त्रिणा डेनिस मन्टूरोव इत्यमुना तत्रैव विमानपत्तने उपस्थाय श्रीमोदिन: अभ्यागमनं सत्कृतम्। रूस देशम्प्रति प्रस्थानात् पूर्व प्रधानमन्त्रिणा श्रीमोदिना एकस्मिन् सामाजिक-सञ्जालीये सन्देशे लिखितं यत् यात्रेयं रूसदेशेन ऑस्ट्रियादेशेन च साकं सम्बन्धानां प्रगाढीकरणे एक: समुत्कृष्ट: अवसर: भविष्यति। एताभ्यां देशाभ्यां साकं भारतस्य मित्रता समयस्य निकषे सुदृढं जातमस्ति। श्रीमोदी उक्तवान् यत् स: एतयो: देशयो: निवसद्भि: भारतीय-समुदायस्य जनै: समम् अपि सम्भाषणार्थं पर्युत्सुकीभवति। रूसदेशे प्रधानमन्त्री श्रीमोदी द्वाविंशे भारत-रूस-वार्षिकशिखर-सम्मेलने भागं भजिष्यति। अपरत्र च असौ ऑस्ट्रियादेशस्य प्रथमयात्रायां गमिष्यति। अस्माकं वार्ताहरो वर्णयति यत् भारत-रूस-सम्बन्धानां विषये प्रधानमन्त्री प्रावोचत् यत् तेन राष्ट्रपति: ब्लादिमिर पुतिनेन साकं द्वैपाक्षिक-सहयोगस्य सर्वे अपि पक्षा: समीक्ष्यन्ते, सहैव श्रीमोदी विभिन्न-क्षेत्रीयेषु वैश्विकेषु च विषयेषु स्वीयं दृष्टिकोणमपि विनिमयीकरिष्यति।

<u>झारखण्ड-विश्वासमतार्जनम्</u>

झारखण्ड-विधानसभायाम् अद्य हेमन्त-सोरेन-सर्वकारेण विश्वासमतम् अधिगतम्। झारखण्ड-मुक्तिमोर्चाया: नेतृत्व-युतस्य संयुते: पञ्चचत्वारिंशद् विधायकै: विश्वास-प्रस्तावस्य पक्षे मतदानम् आचरितम्। अत: पूर्वं मुख्यमन्त्री हेमन्त: सोरेन: राज्यविधानसभायां विश्वास-प्रस्तावं प्रस्तुतवान्। यस्मिन् भूरि चर्चा: सञ्जाता:। मतविभाजनस्य अवसरे विपक्षेण भृशं कोलाहल: समाचरित:। सोरेन-सर्वकारं विरुध्य घोषोच्चारणं कृतम्। विश्वासमतस्य अनन्तरं

सदनम् अनिश्चित-कालावधये स्थगितं जातम्। अष्टचत्वारिंशद्-वर्षीय: सोरेन: कथित-भूमि-प्रवञ्चनायां अवैध-धनाहरण-प्रसंगे प्रत्याभूति-प्राप्तेरनन्तरं एक-सप्ताहाभ्यन्तरे जुलाई-चतुर्थ्यां मुख्यमन्त्रित्वेन शपथ-वचनं स्वीकृतवान् आसीत्। अत्रान्तरे मुख्यमन्त्रिणा मन्त्रिमण्डलस्य विस्तारिकरणप्रसङ्गे द्वौ कांग्रेसदलीयौ नेतारौ एकश्च झारखण्ड-मुक्तिमोर्चाया: नेता मन्त्रिमण्डले समावेशिता सूच्यन्ते इति।

<u>मुम्बई-अतिवृष्टि:</u>

मुम्बय्या: विविधेषु भागेषु अद्य त्रिशतं मिलीमीटरमिताया: अत्यधिकवृष्ट्या: कारणेन सामान्यं जनजीवनं प्रभावितं जातम्। अतिवृष्ट्या मुम्बय्या: अपि च उपनगराणां निम्नक्षेत्रेषु जलं एकत्रितम् अभवत्। नगरस्य जीवनरेखा: उपनगरीय-रेलसेवा: अपि सङ्कटग्रस्ता: सन्ति। वडाला-मानखुर्दयो: मध्ये हार्बर-पट्टिकायां रेलयानानि अस्थायिरूपेण स्थगितानि। एतदतिरिच्य बसयानसेवामार्गा: परिवर्तिता:। विद्यालयेषु महाविद्यालयेषु च प्रथमसत्राय अवकाश: अपि उद्घोषित:। मुम्बई-विश्व-विद्यालयस्य कतिपय-परीक्षा: स्थगिता:। अत्रान्तरे भारतुर्त-विज्ञान-विभागेन-मुम्बईनगर्यां महतीं वृष्टिं समीक्ष्य नारङ्गसङ्केतनापि प्रख्यापिता।

<u>भारतर्तु विज्ञान विभाग: -वृष्टि:</u>

अरुणाचलप्रदेश-नागालैण्ड-राज्ये समेत्य देशस्य पूर्वोत्तरीय-भागेषु धारासार-वृष्टे: पूर्वानुमान: कृत: ऋतु-विज्ञान-विभागेन। आकाशवाण्या सह सम्भाषमाण: ऋतु-विज्ञान-विभागस्य वरिष्ठ: वैज्ञानिका: सोमासेनरॉय: विज्ञापितवती यत् अद्य मध्यभारतस्य अनेकानि क्षेत्राणि अत्यधिकवृष्टे: अवलोकनार्थं साक्षिणो भविष्यन्ति। अपि च, पूर्वोत्तरभारतेऽपि महतीवृष्टि: भविष्यत्येव।

<u>राहुलगांधी-इम्फालयात्रा</u>

नेताप्रतिपक्ष: राहुलगांधी स्वीयैकदिवसीय-यात्रान्तर्गतं मणिपुरं सम्प्राप्तवान् असौ अद्य प्रात: असमस्य कछारक्षेत्रं सम्प्राप्य राज्यस्य जलप्लावनेन प्रभावितै: जनै: सह मेलनं कृतवान्। तदनु असौ मणिपुरस्य जिरीबामजनपदं प्रति अगच्छत् तत्रासौ जनपदे हिंसया प्रभावितै: परिवारै: सह वार्तां कृतवान्। इम्फालस्य यात्रानन्तरं श्रीगांधी चुराचांदपुरं प्रति गतवान्। इम्फालस्य प्रस्थानात् पूर्वं कांग्रेसनेता एष: मणिपुरस्य राज्यपालेन अनुसुइया उइके इत्यनया सहापि मेलनं करिष्यति।

<u>सर्वोच्च-न्यायालय:-नीट-यूजी परीक्षा</u>

शीर्ष-न्यायालय: नीट-परीक्षा-सम्बद्धानां नैकासां याचिकानां वादश्रवणं कुर्वन्नस्ति। अत्रावसरे न्यायालयेन प्रोक्तं यत् परीक्षाया: निरस्तीकरणम् अन्तिमोपाय: स्यात् किन्तु पुन: परीक्षाया: आदेशात् प्राक् प्रश्नपत्राणामुद्घाटनस्य उत्सज्ञानं नूनं कर्तव्यम् । अस्मिन् वादश्रवणे ऐषमो नीट-परीक्षायां कथितानाम् अनियमिततानां, कदाचाराणाञ्च आरोप-विषयिण्य:, पुन:

परीक्षायोजनार्थं निर्देश-प्रदान-विषयिण्यश्च याचिका: अपि समाविष्टा: आसन्। मुख्य-न्यायाधीशस्य डी.वाई.चन्द्रचूड़स्य न्यायमूर्ते: जे.बी.पारदीवाला वर्यस्य, न्यायमूर्ते: मनोज मिश्रस्य च न्याय-पीठेन आहृत्य अष्टत्रिंशद् याचिकानां वादश्रवणं विधीयते। पीठमिदम् सर्वादौ तासां याचिकानां श्रवणं कृतवत् यासु याचिकासु परीक्षाणां कदाचारस्य कारणेन पुन: परीक्षाया: आयोजनं याचितम् आसीत्। एतदनन्तरमेव एन.टी.ए. इति राष्ट्रिय-परीक्षाभिकरणस्य केन्द्रस्य च वादा: श्रोष्यन्ते।

मध्यप्रदेश-मन्त्रिमण्डल विस्तार:

मध्यप्रदेशे अद्य राज्य-मन्त्रिमण्डलस्य संक्षिप्त-विस्तारे राज्यपालेन 'मंगू भाई पटेल' वर्येण रामनिवास-रावताय मन्त्रिमण्डलीय-मन्त्रित्वेन शपथ-वचनं कारितम्। सम्प्रति राज्य-मन्त्रिपरिषदि संहत्य एकत्रिंशन्मिता: मन्त्रिण: सञ्जाता:। अस्मिन् अवसरे मुख्यमन्त्री डॉ. मोहन: यादव:, अन्ये च मन्त्रिमण्डलस्य सदस्या: उपस्थिता: आसन्। श्रीरावत: येन अद्य नूतन-मन्त्रित्वेन पद-गोपनीयताया: शपथवचनं स्वीकृतं, स: चम्बल-क्षेत्रस्य वरिष्ठो नेता वर्तते। असौ विजयपुर-आसनात् षट्कृत्व: विधायकत्वेन प्रचित: अस्ति। अत्रेदमपि ध्येयमस्ति यत् श्रीरावत: कतिपय-मास-पूर्वमेव कांग्रेस-दलात् त्यागपत्रं प्रदाय भाजपादले समाविष्ट: आसीत्।

अमरनाथ-पोनीवाहनम्

जम्मूकश्मीरे कश्मीर-स्वास्थ्य-सेवा-निदेशालयेन श्रीअमरनाथयात्रायै एका विशिष्टा पोनी इति रूग्णवाहनसेवा प्रचालिता। या हि तीर्थयात्रिभ्य: तेषां यात्रावधौ चिकित्सकीसौविध्यानि प्रदास्यति। स्वास्थ्य-चिकित्सा-शिक्षा-सचिवस्य डॉ. सैयद-आबिद-रशीदशाहस्य मार्गदर्शने कश्मीर-स्वास्थ्यसेवा-निदेशकस्य डॉ. मुश्ताक-अहमद-राथरस्य अस्य पदक्षेपस्य यात्रिभि: प्रशंसा कृता।

बिम्बलडन-टेनिस-प्रतिस्पर्धायाम्

सप्तवारपर्यन्तं विश्वविजेता द्वितीयवरीयताप्राप्त: च नोवक-जोकोविच: अद्य रात्रौ षोडश चक्रके द्वन्द्वे पञ्चदश वरीयताप्राप्तेन डेनिश-होल्गर-रून-इत्यनेन सह स्पर्धां करिष्यति। तत्रैव चतुर्थ वरीयताप्राप्त: जर्मन-एलेक्जेंडर ज्वेरेव: स्वीये चतुर्थे चरणे त्रयोदश वरीयताप्राप्तेन टेलर फ्रिट्ज इत्यनेन सह स्पर्धिष्यते।

।। इति वार्ता: ।।